॥ अथ हिरण्यकेशी स्वर्गसत्त्र प्रयोगः

अथस्वर्गसत्रप्रयोगः

श्रीमं[redacted]नमः॥ ॥योगेश्वरीहरिहरेश्वरयोः पदाब्जं नत्वा हिमाचलसुतापतिमादिदेवं॥ विघ्नेशषण्
मुखयुतं भजतामभीष्टदानोद्यतं स्वपितृपादयुगं गिरं च॥१॥ गुरुपादाब्जयुगलं मज्ज्ञानध्वांतनाशनं॥ बाबूल
ज्ञो वितनुते स्वर्गद्वारेष्टिपद्धतिं॥२॥ अ[redacted]सायाचारूरूपानुसारी स्वर्गद्वारेष्टिप्रयोगः॥ तत्रत्तत्त्वदृष्ट्वा तो देवे
भ्यो वै स्वर्गो लोकस्तिरोऽभवत्। ते प्रजापतिमब्रुवन् इत्यादिना देवास्तिरोहितस्वर्गलोकज्ञानार्थं प्रजापतिं
विज्ञापयामासुस्तदा स प्रजापतिस्तिरोहितं स्वर्लोकं यज्ञक्रतुभिरन्विष्यमाणो नाविंदत्॥ ततइष्टिभिर
न्विष्यमाणः स्वर्लोकमविंदद्दतस्ता एष्टयो नाम ताइष्टयइत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवा इत्यस्मिं
ते न यद्भागेनेष्टिशब्दनिरुक्तिराम्नाता॥ एवमिष्टिभिः प्रजापतिना स्वर्लोके ज्ञाते तद्द्वाररक्षणकर्त्र्यो देवताः
समुदायद्वयरूपेणास प्रपंचवेति विवियंते॥ तत्राद्यसमुदेवतासमुदायस्था प्रथमा देवता[redacted]आशानाम॥
सा प्रजापतिमागत्य स्वनाम कथित्वा मां नु यजस्व। अथ ते सत्या शा भविष्यति। अनु स्वर्गं लोकं वेत्स्यसीत्युक्तवती॥ त
तः स एतमग्नये कामाय पुरोडाशमष्टाकपालं निरवपत्॥ आशायै चरुं। अनुमत्यै चरुं। ततो वै तस्य सत्याशाऽभवत्
अनु स्वर्गं लोकमविंदत्॥ इति परकृतिरूपमर्थवादमुक्त्वा य एतेन हविषा यजते य उ चैनमेवं वेद। सोऽत्र जुहोति
अग्नये कामाय स्वाहाऽऽशायै स्वाहा। अनुमत्यै स्वाहा। प्रजापतये स्वाहा। स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते
स्वाहेति॥ अत्र यो यजते तस्य आशा सत्या = सत्या ह वा अस्याशा भवति॥ अनु स्वर्गं लोकं विंदति = भवति वतः
स्वर्लोकं च विंदतीत्येवमुक्तं॥ एवमग्रेपि कामाद्येकैकया देवतया आगस्यो क्तं॥ एवमत्र द्वैध्य देवतासमुदाया

स्वरूपबोधनाद् उत्पत्तिविधिरप्यत्रैव ज्ञेयः॥ समुदायांते च त्वा वाएताः सप्त स्वर्गस्य लोकस्य द्वारः दिवः श्येनयो
वित्तयो नामेति कर्मनामनिर्दिश्य॥ अग्रे अनुरयैस्वर्गंल्लोकं विंदति। कामं चारोस्य स्वर्गेल्लोके भवति। इतिफ
लंउक्ता तास्वन्विष्टि पष्ठो हीवरां दद्यात् कं सेव। स्त्रियैवा भारं समृध्या इति दक्षिणा उक्ता॥ एवं द्वितीयसमु
दायांते पिता वाएताः पंचेत्यादिना नामफलदक्षिणा उक्ताः॥ उपहोमास्तु यो यजते सोत्र जुहोतीत्यादिना प्रति
ष्ठि उक्ताः॥ एवं यद्यदपेक्षितं तत्सर्वं श्रुत्यैव विहितं॥ अतो भगवता सत्याषाढेन स्वसूत्रे दिवश्येनीभि
र्यजेत स्वर्गकामो यजेतापाघाभिश्चेति विधिमुन्नीय ता आम्नायव्याख्याता इत्येतावदेव सूत्रं प्रणीतं॥
तेन श्रुतौ यथा उपदिष्टास्तथा कर्तव्या इति सूचितं॥ विधिवाक्ये च कामिपदसमभिव्याहारादासां काम्यत्वं
अतः काम्येष्टि परिभाषा प्राप्तिरप्यस्ति॥ सा च॥ काम्याभिरिष्टिभिरमावास्यां पौर्णमासीं वा संस्थाप्य यजेत
ता आम्नायव्याख्याताः सद्यस्कालाउपांशु तंत्रा यथा प्रकृति वैकृत दक्षिणाः सान्नाय्यवंत्य स्तु द्व्य
हकालाः समिध्यमानवतीं समिद्धवतीं चांतरेण पृथुपाजवत्यौ धाय्ये अनुपद्वावाज्यभागौ यत्कामेष्टिः स्त
त्रवाद्वीस्यात् तान् दर्थवतालद्धवतौ प्राक् तौ वा नादेशे प्रकृतिः प्रयेत स्यात्॥ अत्र कालस्वर सामिधेनी साम्नद
श्यादि धर्मा उपदिष्टास्ते वासु कर्तव्याः॥ आसामुपक्रमकालश्चाद्विज्ञाकृतास्य पष्ठे खेनोक्तः॥ इष्ट्वामावा
स्यया तत्र प्रथमायामुपक्रमः॥ इति॥ अत्र प्रतीष्टि प्रथमसमुदाये आग्निः कामेनुमतिश्चेति सं[illegible]र देवते आ
ग्नेय विकारे॥ द्वितीयसमुदाये गुणरहितः केवलोग्निरनुमतिश्चेति द्वे ते अपि॥ द्वादशानां विशेष देवतानां
मध्ये आपैन्द्राग्नविकाराः॥ अवशिष्टा आग्नेय विकारा एव॥ अतः पंचमीमिष्टिं विना सर्वासु कालतस्तंत्रे
* इतिप्राप्ति कथनं॥ वक्तव्यास्तु॥ आसामिष्टीनां तंत्रे करणे पाठाभावादुपांशुस्वरस्य सामिधेन्यस्य च प्राप्तिः॥ विकृतौ च नयत्रास्ति सामिधेन्य
* पुनः श्रुतिरिति वार्तिकेन प्रकृतौ सामिधेन्य पुनः श्रुत्यभावाद्विशिष्टत्वाद्विकृतौ च पांचदश्यस्यैवास्ति द्वोतितत्वात्॥ आसु पांचदश्यमेव॥

न·स· दितव्यं॥ कालनस्तंत्रंनामशुक्लाष्टम्युत्तरार्धमारभ्यकृष्णाष्टमीपूर्वार्धावधिकेकालेकर्तव्यास्त्विष्टिपुपोर्णमा
२ धि संतंत्रं॥ कृष्णाष्टम्युत्तरार्धमारभ्यशुक्लाष्टमीपूर्वार्धाव[illegible]केकालेदार्शिकंतंत्रमिति॥ पंच्यामिष्टोतुनियतंदा
र्शिकमेव॥ अपांएंद्राग्नविकारत्वात्॥ ॥अथप्रयोगः॥ यजमानआचांतःसपत्निकस्तीर्थेनप्रपद्यगार्ह
पत्यस्यपश्चाद्दर्भेष्वासीनोदर्भान्धारयमाणःप्राणायामत्रयंकृत्वेष्टदेवतागुर्वादीन्नमस्कृत्यसुमुखश्चे
त्यादिनागणेशादीन्स्मृत्वादेशकालादिसंकीर्त्यस्वर्गकामःश्रीपरमेश्वरप्रीत्यर्थंदिवःश्येनानुवित्तीष्टि
भिर्यक्ष्येताभिःस्वर्गलोकमाप्नवानि॥ निर्विघ्नार्थंगणपतिपूजनंपुण्याहवाचनंचकरिष्ये॥ इतिसंकल्प्य
गणेशंसंपूज्यपुण्याहंस्वस्त्ययनमृद्धिमितिवाचयित्वाआसुदिवःश्येन्यनुवित्तीष्टिभ्यश्चयर्युत्वामहंवृणइत्य
ध्वर्युमेवंब्रह्महोतृग्नीध्रावृत्वायथाविभवंपूजयेत्॥ ततोध्वर्युर्गार्हपत्येआज्यंसंस्कृत्याहवनीयंपरिस्तीर्य
कपंचाशद्गृहीतमाज्यंगृहीत्वेकपंचाशत्समिधोभ्याधायाग्नेणाहवनीयंगत्वेत्यादिदर्विहोमधर्मेणैकपंचा
शदाहुतिहोमयजमानोपस्थानसमिदाधानवरदानांतंकूश्मांडहोमंसमापयेत्॥ ततोयजमानः॥ गार्हपत्य
स्यपश्चाद्दर्भेष्वासीनइत्यादिश्रीप०र्थमाश्राष्ट्या यक्ष्ये॥ तयायज्ञपुरुषंप्रीणयामिपुरुषएवेदमितिपुरुषंध्या
येत्॥ अध्वर्युः॥ ममाग्ने० अग्नय० इमाम्ऊर्जयातिथि॥ एवंदर्शतंत्रेसर्वत्र॥ पौर्णमासेतु॥ उत्तमंयज्ञाय॥ इमामू
र्जयेप्रविष्टाइति॥ देवश्येनं० हविः॥ वेदंकृत्वावेदिः॥ बर्हिराहरति॥ ततस्त्वात्रयोविंशतिधा॥ तरुडीमुपवेषः॥
परिस्तरणीत॥ नोभावग्नी॥ कर्म=यजमानस्यव्रतं=पोवां० यज्ञस्यसं० सदने० पात्रासा[illegible]नेअष्टौकपालानिद्ध शिवः
स्थाल्योसमक्षणे॥ पात्र्यासहतंडुलसंवापपात्रं॥ अन्वाहार्यस्थालीवर्ज्यमितरापिप्रकृतिवत्॥ यज० भूपते० २

इतिकेचित् ३

अहंक्रप॰ वाचस्पत इत्यादि॥ अध्वर्युः पवित्रेस्थ इत्यादिनि र्वापे। यक्षं॰ देवस्य॰ भ्यामग्नयेकामायजुष्टंनि॰
पुरोडाशार्थंनिरुप्य॥ यक्षं॰ देव॰ भ्यामाशायेजुष्टंनि॰ यक्षं॰ देवस्य॰ भ्यामनुमत्येजुष्टंनि॰॥ इदमित्यादि॥
अग्नेकामहव्यं ॰ं र॰ आशेहव्यं ॰ं र॰ अनुमतेहव्यं ॰ं र॰ प्रोक्षणे॥ देवस्य॰ स्ताभ्यामग्नयेकामायाशाया अ
नुमत्येवोजुष्टं प्रोक्षामि॥ शुंधध्वमित्याद्यं ॰ं शवस्थाले॥ यथाभागं व्यावर्त्तध्वं॥ इतिपुरोडाशार्थंतं ती मंत्रे
पृथक्कृत्वा॥ इदमग्नयेकामायच॥ इतिनिर्दिश्यतद्द्विगुणद्वितीयेवर्धरारो॥ इदमाशायेवानुमत्येव॥ इति
निर्दिश्याधिवपनादिपुरोडाशार्थानांप्रकृतिवत्कुर्यात्॥ धृष्टिरसीत्यादिआग्नेयवदष्टाकपालानुपधाय॥
अपाग्ने॰ आदेवयजं॰ ध्रुवासि॰ ऊरु स्थालीमुपधायेवंद्वितीयांचोपधाय भृगूणामंगिरसां॰ प्यध्वंम
प्यस्वेतिस्थाल्यो॥ पात्रीनिष्टप्य देवस्यत्वेतिपिष्टानिसमोप्य संवापपात्रेभ्यः पादेवतेनेवमंत्रेणतंडुलान्स
मोप्य हर्यास्त्वेतिपिष्टानितंडुलांश्चो●त्पुनाति॥ समापइत्यादि॥ पुरोडाशंकृत्वासंवापपात्रस्थांस्तंडुल
न्यथाभागंव्यावर्त्तेथामितिद्विधाविभज्य॥ इदमाशाये॥ इदमनुमत्यै॥ इतिनिर्देशः कार्यः॥ नेतिवेजयतीक
रः॥ तस्यपूर्वजातत्वात्॥ पुरोडाशमधिश्रित्यघर्मोसीत्युविकृतेनेवमंत्रेणस्थाल्योस्तंडुलानधिश्रयति॥
समापइतिस्थाल्यांप्रणीताआनीय अग्निइतितमा आनीयसमग्निरितिप्रदक्षिणमनुपरिक्षयति॥
एवमेवद्वितीयस्थाल्यांततः उरुप्रथस्वेत्यादि॥ प्रथनपरिमार्जनाभिज्वलनभस्माध्यूहनानितनुवेः॥
अविदहंतेत्यादिसर्वज्योतिर्विनाविता ... कुर्यात्॥ स्योनं तंरतिपात्र्यांसहउपस्तरणं॥ आप्यायतांघृ
तेनसाग्नयेकामायेजुष्टमभिघारयामि॥ आप्याय॰ तेजसाशायेजुष्टं॰ आप्याय॰ जसानुमत्येजुष्टम॰॥ मि॥

स्व-स-
३

आर्द्रः प्रथस्नुरितिपुरोऽशं॥आर्द्रांभुवनस्येतिवरूवोद्वास्य॥इत्यादि॰ देवस्त्वेतिक्रमेणालंकृत्यन्तु
ष्टीमासादयत्सर्वेषामाग्नेयत्वात्॥यजमानः॥यज्ञास्कसर्वतः श्रिताः सर्वतोमा॰ यंतां॰ शतम॰॥अयंय॰
ज्ञः पंचहोता॥दर्शतन्त्रे॥पौर्णमासेतुविहव्यं चतुर्होता॥वेदंनिधायेत्यादिप्राकृप्रधानात्प्रकृतिवत्॥होता॥
नमः प्रवक्त्र इत्यादिसप्तदशसामिधेन्यः पृथुपाजाः स्तंसबाधः॥याजुषहौत्रे वेदेनायेअग्निरित्यादि॥इति
हं॰ सप्तदशेन॰ सप्तदशसामिधेन्यः पूर्ववत्॥आवाहने॥आज्यभागावावाह्य॥अग्निंकाममा॰॥आशामा॰
शासामिधेन्योनेन अनुमतिमा॰ देवां इत्यादि॥उत्तमेप्रयाजे॥ये॰ य॰ हेस्वाहाग्निं स्वाहासोमं स्वाहा॰ ग्निंकामं स्वाहा
शांस्वाहा नुमतिं स्वाहादेवा॰ याजुषेतु॥ये॰ य॰ हेमं॰ ३॰ व॰ स्वाहाग्निं॰ स्वाहासोमं॰ स्वाहा ग्निंकामं॰
स्वाहाशां॰ स्वाहानुमतिं स्वाहादेवा॰ वार्त्रघ्नावाज्यभागावाश्वलायनीये॥याजुषेतत्रानुगुणो॥अध्वर्युः
प्रधानप्रचारे जुह्वामुपस्तीर्येत्यादिसर्वत्र॥अग्नयेकामायानु॰ आश्रा॰ अस्तु॰ अग्निंकामयज॥येयजामहे
हे॰ग्निंकाममश्याम॰ जरंता इवो॰॥=होता॥नुम्यंता अं॰ कामायेयमिरा॰॥त्र याजुषहौत्रेतु॥ये॰ य॰ हेग्नि
सुव कामंभ॰ र्भुवो रितिसर्वत्रविशेषः॥यजमानः॥अग्नयेकामायेदं॰ अग्नेः कामस्याहं दे॰ यान्नारो॰॥आशायाअ
नुब्रू॰ हि॥आशानांत्वाशापा॰ विषावयो॰॥आश्रा॰ अस्तु॰ आशांयज॥ये॰ य॰ हेआशांविश्वाआशान॰
तुसर्वा॰ इवो॰॥ये॰ हेआशां भ॰ वोविश्वाआ॰॥यजमा॰ आशाया॰ आशायाअहंदे॰ यान्नादोम॰ उपस्ती
र्येत्यादि॥अनुमतयेनुब्रू॰ हि॥अनुनोद्य॰ क्षमयो॰॥भवतांभवतं इतियाजुषाश्वलायनयोर्भेदः॥आश्रा॰ शिवः
अस्तु॰ अनुमतिंयज॥ये॰ य॰ हेनुमतिमन्वि॰ नस्कृधि॰ क्र॰ षा॰ दो॰॥याजुषेतु॥ये॰ हेनुमतिं म॰ दन्वि॰ पा॰ वो॰ ३

यज॰ अनुमत्या इदं॰ अनुमत्या अहं दे॰ यान्ता दोभू॰ अध्वर्युः स्रुक्कांध्रौवमाज्यं षड्गृहीतं गृहीत्वाग्ने
याहवनीयं परीत्य दक्षिणतस्तिष्ठन् विग्राहं षडुपहोमान् जुहोति॥ अग्नये कामाय स्वाहा॥ यज॰ अग्नये का
मायेदं॰ आशायै स्वा॰ आशाया इ॰ अनुमत्यै स्वा॰ अनुमत्या इ॰ प्रजापतये स्वा॰ प्रजापतय इ॰ स्वर्गाय लो
काय स्वा॰ स्वर्गाय लोकायेदं॥ अग्नये स्विष्टकृते स्वा॰ अग्नये स्विष्टकृत इदं॥ यथेतमागत्य पुनर्ध्रौवम
ष्टादशगृहीतं गृहीत्वा नयेवगत्याग्निर्भूतानामधिपतिः समावत्व॰ हुत्वा स्वाहा॥ इत्यादिकैः सप्तदशभिः
सप्तदशाहुतीर्हुत्वाध्वर्युयजमानौ प्राचीनावीतिनो भूत्वा पितरः पितामहा इत्यष्टादशीं हुत्वा यज्ञोपवीतिनौ
वप उपस्पृशतः॥ अंसेनोपतिष्ठेद्॥ न त्यक्षे सप्तदशगृहीतमेव॥ ततः स्विष्टकृता प्रचरति॥ अग्नये स्विष्ट
कृतेनुब्रूहि॥ होता॥ हव्यवाहमभिमातिषाहं॰ र = एत द्वोमप्राप्तिः काम्येष्टिस त्रात॥ = स्तो॰ कुर्वमो ३ म॥
आश्रा॰ अस्तु॰ अग्निं स्विष्टकृतं य॰ होता॥ येयू॰ स्विष्टकृतमयाळग्नि॰ याः सोमस्य प्रि॰ याळग्नेः का
मस्य प्रि॰ याळाशायाः प्रि॰ अनुमत्याः प्रिया॰ याद्देवाना॰ जुषतां हविः स्विष्टम॰ आयुर्वौ॰ याजुषेतु॥ ये
य॰ हेग्निं स्विष्टकृतं भूर्भुवः सुवरयाळग्निर॰ याः सोम॰ याळग्नेः कामस्य प्रिया॰ याळाशायाः प्रिया॰ याळनु
मत्याः प्रि॰ याद्देवानामा॰ षतां हविः स्विष्टमग्ने अ॰ आयुर्वौषट्॥ यजमानः॥ अग्नये स्विष्टकृत इदं॰ अग्नेः
स्विष्टकृतो॰ अग्निर्मत्यादि सर्वेषां विसृज्य प्राशित्रं॥ याजुषे होत्रपक्षे॥ इगपरु॰ हुत्वोपरुलेऽतिमं त्रांतः॥
अन्यत्प्रकृतिवत्॥ सर्वेषां चतुर्धाकरणं॥ दक्षिणाकाले॥ पष्ठौही वरकंसौ प्रस्थानि कांचीनं पुरादीन्यत वी
दिनिधाय दद्यात्॥ ब्रह्मा॥ ब्रह्मा नि ब्रह्मा नि स्तब्ध सणे वा कुता द्याति = स्या = मामाहिं सिष्टा कुता निमहे॥

स्व.स॰
४

शिवा। निमर्वर्तं॥ प्रजापते भागो॰ के॥ यजमानः॥ सहस्रधाराण्युत्तान्यक्षीयमाणानि॥ तानिदध्नः पृथि
वीमंतरिक्षं दिवं चैतेः पष्ठौही वरकंसाभरणोरति॰ प्रजापते॰ के॥ अध्वर्युः॥ दक्षिणासद्ध उपह॰ यजमा॰ दक्षि
णतएत॥ ब्रह्मणा इमानिवः पष्ठौही वरकः साभरणानियथाभागमहिं संतः प्रतिगृह्णीध्वं॥ आग्नीध्रः॥
सप्तदशकंसोपान्य॥ देवस्य त्वास॰ दक्षिणोरुद्रायगोलयाग्न॰ तु॥ इतिपष्ठौही॥ पुनः सप्तदशकंसोपान्य॥
उत्तानस्त्वांगीरसः प्र॰ तु॥ इतिकंसं॥ देवस्यत्वा॰ दक्षिणे [illegible] प्सराभ्योलंकरणंतेना॰ तु॥ इत्याभरणानि
प्रतिगृह्णीयात्॥ एवंक्रमेणाग्ने॰ पुनः स॰ ग्रहोत्रध्वर्यवः प्रतिगृह्णीयुः॥ अनूयाजार्थंउल्मुकेऽपि व
ज्यंत्यादि सर्वंदर्शवत्॥ सूक्तवाके होता॥ अग्निरिदं ह॰ सोमइ॰ अग्निः कामइ॰ आशेदं ह॰ अनुमतिरि॰
देवा इत्यादि॥ यजमानः॥ अग्नयेकामायेदं॰ अग्नेः कामस्याहमु॰ आशायाइदं॰ आशायाअहमुज्जिति॰
अनुमत्याइ॰ अनुमत्याअहमु॰ एमा अ॰ प्योतुयज्ञोमइत्यस्यस्थाने स्वर्लोकोमआगम्यात्॥ न हविःशेष इ
तिकेचित्॥ वस्तुतस्तु॥ अंगुष्ठपर्वमात्राणिप्रधानावदानेतेभ्यो भूयिष्ठानि सौविष्टकृतानितेभ्यऐडानि
तेभ्यश्चतुर्धाकरणिकानि इत्येवंप्रकारेणावदानेषुगृहीतेषु या [illegible] पत्तिर्हविःशेषभक्षणाभ्यं
तरानभवतु॥ अतो हविःशेषभक्षणं कर्तव्यं॥ यावद्धविरवशिष्टंतावतः सर्वस्य इडायां चतुर्धाकरणे प्राप्त
तिपत्तेर्विनिर्गमनाविरहात्॥ आज्यलेपान्प्रस्तरे इत्यादि॥ चत्वारः पत्नीसंयाजाः॥ न पार्वणाः॥ अन्य
सर्वंदर्शवत्॥ ॥ संस्थित [illegible] ष्टिः॥ ॥ प्राग्मूलेगार्हपत्यस्यपश्चादित्यादिस्वर्गकामः श्रीपर॰ थे

ना

शिवः
४

कामेष्ट्यायक्ष्ये॥ तया॰ पुरुषप॰ यता एव र्त्विजः॥ ममाग्ने॰ अग्र प॰ इमान्जेंयथा तिथि॥ देवश्येनः ह
कामेष्ट्यायक्ष्ये॥ तया॰ पुरुषप॰ यता एव र्त्विजः॥ ममाग्ने॰ अग्र प॰ इमान्जेंयथा तिथि॥ देवश्येनः ह
विरित्यादि सर्वमाशेष्टिवत्॥ निर्वापे॥ अग्नयेकामायाष्टाकपालं निरुप्य॥ देवस्य॰ त्वां कामाय जुष्टं नि
र्व॰ अनुमत्यै जुष्टं निर्व॰ इति चरुद्वयं निरुप्य॥ अग्नेकामहव्यं॰ कामह॰ अनुमतेह॰॥ प्रोक्षणे॥ देवस्य॰ त्वा
मग्नयेकामायकामायानुमत्यैवोजुष्टं प्रोक्षामि॥ भागधिवपनादाशेष्टिवद्द्विभागद्वयं कृत्वा॥ इदमग्नयेका
मायच॰ पुरोडाशार्थीन॥ इदंकामायचानुमत्यैच॥ चर्वर्थानां निर्देशः॥ अधिवपनादि सर्वमाप्रधानप्रचा
राद्धोत्रमाध्वर्यवं चाशेष्टिवत्॥ प्रधानप्रचारकाले॥ अग्नेः कामस्य प्रचाराद्याशेष्टिवत्॥ द्वितीये॥ कामा
यानुब्रूहि॥ होता॥ कामाभूतस्य भ॰ जतेवशी ३ म॥ [illegible] कामंयज॥ हो॰ ये३ यजामहे कामंकामस्तद्
ग्रस॰ नीषाद्वौ३॥ पानुषेतु॥ ये३ य॰ हे कामं भूर्भुवः सुवः कामस्तदिति विशेषः॥ अनुमतियागः पूर्व
= तत्र॥ आवाहने ग्निकामानुमत्यो र्मध्ये काममाउवह॥ उत्तमे प्रयाजे वत्तत्रैव कामंस्वाहेति विशेषः॥ = वद्
षड्हीलंगहीत्वा दर्विहोमधर्मेण॥ अग्नयेकामायस्वाहा॥ कामायस्वा॰ अनुमत्या इत्यादि॥ यथालिंगं
यागः॥ आशेष्टिवद्भ्यालानान्ऊत्वा स्विष्टकृतां प्रचरति॥ होतुस्त॥ अग्निकामेनिगमनोत्तरं अया
ट्कामस्य प्रिया धामान्ययाळनुमत्या इत्यादि॥ सूक्तवाके॥ अग्निकामानुमत्योर्मध्ये॥ कामइदंह॰ कृता॥
यजमानः॥ कामायेदं॰ कामस्याहमु॰ इतरत्सर्वेषां सर्वमा = पत्॰ कामायेदं॰ कामस्याहंदे॰ यां तास्ते॰॥ = शेषं
ष्टिवत्॥ ॥ संलिष्ठ [illegible] दित्यादि श्रीपरमेश्वरप्रीत्यर्थं अस्तु

घृणायघ्ने॥तया॰पुरुषए॰वृत्ताएवर्तिजः सर्वत्र॥अतः प्रतीष्टिब्रह्मवरणमपिन॥समाप्ते॰अग्नय॰इमा
मूर्जेयथातिथि॥दैवश्येनं हविः॥ कालतरन्तंत्रं॥सर्वमाशेष्टिवत्॥निर्वापे॥अग्नयेकामायपुरोडाशंनि
रूप्यचरुद्वयंनिर्वपेत्॥दे॰न्यां ब्रह्मणेजुष्टं [illegible] ग्नेकामाय॰ब्रह्मह॰अनुमते॰प्रोक्षणे॥दे॰न्यामग्न
ग्नयेकामायब्रह्मणेनुमत्यैवोजुष्टंप्रो॰प्रागधिवपनादेकांशंद्व्यंशरूपेराशीकृत्वाप्रथमे॥इदमग्नये
कामायच।इदंब्रह्मणेनानुमत्यैच॥अधिवपनाद्योद्वासनान्तांशेष्टिवत्॥अभिघारणेआद्यस्यकृते
तेजसाब्रह्मणेजुष्टमभि॰अनुमत्यभिघारणादिसर्वमाशेष्टिवत्॥आप्रधानप्रचाराहध्वर्यवंहोत्र
त्र॥तत्रहोत्रे।आवाहने॥ग्निकामानुमत्योर्मध्ये॥ब्रह्माउवह॥उत्तमेप्रयाजेपितस्मिन्नेवस्थानेब्रह्मस्या
हेतिविशेषः॥अध्वर्युः॥अग्नेः कामस्यपूर्ववत्प्रचारंकरोति।ततः॥ब्रह्मणेनुब्रूहि।होता॥ब्रह्मजज्ञा
नंप्र॰स्वविवोउभ॥अध्वर्युः॥आश्रा॰अ॰ब्रह्मयज॥होता॥येउय॰हेब्रह्मपिताचि॰वर्धयंताउवोउष
याजुषेविशेषः पूर्ववत्॥यजमानः॥ब्रह्मणइ॰ब्रह्मणोहंदेवय॰यावादोजूयासं॥आशेष्टिवदनुमतेः
प्रचारः॥ततः षड्होतेदर्विहोमधर्मेण॥अग्नयेकामायस्वाहा॥ब्रह्मणेस्वाहा॥अनुमत्याइत्यादि॥
अन्वातानहोमश्च॥स्विष्टकृत्प्रचारे॥होता॥अग्निकामोत्तरं अयाड्ब्रह्मणः प्रिया॰अनुमत्याइ
त्यादि॥सूक्तवाके॥अग्निकामइ॰ब्रह्मेद॰अनुमतिरि॰यज॰ब्रह्मणइ॰ब्रह्मणोहमुज्जि॰अनुम
त्याइत्यादिसर्वमाशेष्टिवत् ब्रह्मणस्तर्पणांतेसिद्धमिष्टिः संतिष्ठते॥ ॥अथाग्न्योत्सर्गेगार्हपत्यस्य॰

पञ्चम्यादित्यादिश्रीपरमेश्वरप्रीत्यर्थं यज्ञेष्ट्या यक्ष्ये॥ तया० पुरु० कालतस्तंत्रं॥ ममाग्ने० अद्य० मर्ज्जयथा
तिथि देवशेयनं हविः॥ अंतराग्नीत्यादि निर्वापपर्यंत आशोष्टिवत्॥ देवस्य० न्यामग्नयेकामाययजुं० पुरोड
शार्थोन॥ देव० न्यांयज्ञायजुष्टंनि० अनुमत्यैजु० चर्वर्थान्॥ अग्नेकामह० यज्ञहव्य० अनुमते० प्रोक्षणी॥ देव०
न्यामग्नयेकामाययज्ञायानुमत्यैवोजुष्टंप्रोक्षामि॥ प्रागधिवपनात्पूर्ववद्गिजव्याभिमर्शनं॥ इदमग्नये
कामायेन॥ इदंयज्ञायवानुमत्यैन॥ अधिवपनाद्याज्याभिघारणांते॥ आप्या० जसायज्ञाययजुष्टमभिघा
रयामि॥ उद्वासनादिसर्वमाज्यभागांतं प्रकृतिवत्॥ होतुरावाहनकालेग्निकामोत्तरं॥ यज्ञमाऽव० अनु
मतिमित्यादि॥ उत्तरेप्रयाजेग्निकामोत्तरं॥ यज्ञंस्वाहेतिविशेषः॥ प्रधानप्रचारेग्निकामस्यानुवाक्या॥ य
ज्ञायानुब्रूहि॥ यज्ञायायोयज्ञई० एवां अप्येतुदेवो उम्॥ आश्रा० अस्तु० यज्ञंयज॥ ये३यं० यज्ञंमयंयज्ञोव०
अवंतुदेवावो३ षट्॥ अनुमतियागःपूर्ववत्॥ ततःषडुगृहीतेनोपहोमन्त्र॥ अग्नयेकामायस्वाहा॥ यज्ञायस्वा०
अनुमत्याइत्यादि अभ्यातानहोमांतेस्विष्टकृत्॥ तत्र॥ अग्निकामोत्तरं अयाऽयज्ञस्यप्रिया० याळनु
मत्याइत्यादि॥ सूक्तवाके॥ अग्निकामोत्तरं॥ यज्ञइदंह० कृत॥ अनुमतिरित्यादि॥ यजमानः॥ यज्ञाये
=यजमानः॥ यज्ञायेदं० यज्ञस्याहंदेवयज्यया नादो० इदं० यज्ञस्याहमुजि० अनुमत्याइत्यादि॥ सर्वमन्य
दर्शेष्टिवत्ब्राह्मणतर्पणांतं सिद्धंनिष्टिः संतिष्ठते॥ ॥अ[illegible]ये मार्द पत्रस्यपञ्चम्यादित्यादिश्री
परमेश्वरप्रीत्यर्थमनविष्ट्या यक्ष्ये तया० मि॥ पुरुष० हति॥ अस्यामामावास्यं तंत्रं नियतमेव॥ ममाग्ने०

अद्ययज्ञाय॥इमामूर्जंमथ्यातिथिपदैवरयेनꣳहविः॥यजमानेनअनग्रहणोकृते तु एकोमासिदमादायवेदं कृत्वा

स्व॰स॰ ६ वेदिकरणं॥बर्हिराहरणादि॥अग्निकामपुरोडाशनिर्वापंतमाशेषितत्कृत्वा।देवस्यत्वा॰ग्न्यामग्नेर्जुष्टंनिर्वपा॰

वर्वर्थौ।निरुप्यानुमतयेचरुंनिर्वपति।इदमित्यादि।अग्नेकामहव्य॰आपोहव्यꣳरक्षध्वं॥अनुमतेह॰प्रोक्षणं॥

दिवस्य॰ग्न्यामग्नयेकामायानुमत्यैवोजुष्टंप्रोक्षाम्यहम्ः॥शुन्धध्वमित्यादि अवꣳशवस्तं ते॥यथाभागंव्यावर्तेथां॥

इतिएकभागएकोराशिः द्वितीयस्तद्विगुणः॥एवंराशिद्वयंकृत्वा देवतामुपलक्षयेत्॥इदमग्नयेकामायच।इति

प्रथमे॥इदमग्नयेनुमत्यैच॥इतिद्वितीये॥ततआज्यस्याधिवपनादि॥सर्वमार्हावेरुद्वासनादाशेषितत्॥

उद्वासनेतु॥इदमहमित्यादि॥आप्याय॰तेजसाग्नयेकामायजुष्टमभिघारयामि॥तूष्णीमापंचरुं॥मंत्रेणानु

मतंचरुंएवमभिघार्योद्वास्य कपालान्यभिघार्योद्वास्यालंकृत्य॥प्रियेणधाम्ना॰आसीदंतु।इयपरेणस्रुवं

आसादनेकृतेयजमानः॥यज्ञोस्थः सर्वतःश्रितोसर्वतोमं॰ ये ताꣳ॰मतीः॥योनः कनीयइह॰अपत

मापोभुवनावुदंतामहेभ्य॰अयंयज्ञः पंचहोता॥वेदंनिधायेत्यादि आग्निकामस्यागंतमाशेषितत्॥होतु

स्रुः॥अग्निंकाममा३व॰अपआवह॥अनुमतिमित्यादि॥उत्तमेप्रयाजे॥ये३य॰ग्निंकामस्वाहापः स्वाहा

नुमतिमित्यादि॥आश्वलायनहोत्रेपक्षेवात्रैधावेवाज्यभागौ॥याजुषेत्वधन्वंतौ॥अग्निंकाममाशेषितविदित्वा

वरोरवराय॥अग्नोनुब्रूहि॥अग्नेयज॥ये३य॰हे३प॰आदित्यश्या॰मद्भावा३वौ३प॰।यज॰अग्ना३इ॰।अ

=होता॥आपोमहाघृत॰देवसागो३म्॥=यामहंदेवयज्यये द्वियावज्ञादोभि॰॥अनुमतिमिद्धापह्नहीतेन शिवः

हीस्वादर्विहोमधर्मेणजुहोति॥अग्नयेकामायस्वाहा।अनुमः स्वाहा॥अनुम॰प्रजाप॰स्वर्गा॰अग्नयेस्विष्ट॰ ६

ततोष्टादशगृहीतेनाज्येनानहोमः॥ स्विष्टकृताप्रचर्याग्निकामानुमत्यौर्विरुज्य प्राशित्रं। अविरुज्येतरस्य॥
चतुर्धाकरणं वाग्निकामानुमत्योरेव॥ इडावदानादि सर्वमन्यद्दर्शेष्टिवत्॥ सूक्तवाके होतृयजमानयोर्विशेषः
अग्निः कामइदं० कृत॥ आपइदं ह० वंतावीवृधंतम० कृत। अनुमतिरिदमित्यादि॥ यजमानः॥ अग्नयेकामाय०
अग्नेः कामस्याहमु०। अग्नइदं० अपामहमु० अनुमत्या अहमित्यादि॥ हविःशेषभक्षणं॥ चत्वारः पत्नीसंया
≡ होतायेऽ३यं० हेग्निंस्विष्टकृ० ग्नेः कामस्याप्रि० न्यया ळ पांप्रिया० ळनुमत्याइत्यादि॥ ≡ जाः। नपार्वणाः॥ प्राश्न
पात्रर्पणांतं सिद्धमिष्टिः संतिष्ठते॥ ॥अ[illegible]नेगार्हप० श्रीपरमेश्वर प्रीत्यर्थमग्निबलिमद्दिष्टयायक्ष्ये
तया० पुरुष० हति॥ कालनस्तंत्रं मंभागितवर्धइत्यादि अग्निकामनिर्वापांतमाशेष्टिवत्॥ ततः देव० त्वामग्नये
बलिमतेजुष्टं निर्वपामि। इति वर्ष्यान्निरुप्यानुमत्येवरुं निर्वपति॥ अग्निकामह० अग्नेबलिमन्हेमा० अनुमते ह०
प्रोक्षणे। देव० त्वामग्नयेकामायाग्नयेबलिमतेनुमत्येवोजुष्टं प्रो०॥ शुंधध्वमित्यादि अधिवपनात्प्राक्पूर्ववं
द्विरुज्यद्वितीयराशौ देवतेः लक्षयेत्॥ इदमग्नयेबलिमते वानुमत्येव॥ अधिवपनादि आद्यं हविरभिघार्य तेन
साग्नयेबलिमतेजुष्टमभिघारयामि॥ अनुमत्यभिघारणादि आद्यहविः प्रचारांतमाध्वर्यवमाशेष्टिवत्॥ हो
त्रेतु॥ आवाहने॥ आज्यभागेदेवते आवाह्य अग्निंकाममा० अग्निं बलिमंतमा० अनुमतिमित्यादि॥ उत्तमेप्र
याजे॥ ये ३ यु० ग्निं कामं स्वाहाग्निं बलिमंतं स्वाहानुमतिमित्यादि॥ अग्निकामयागांतमाशेष्टिवत्॥ ततः अ
ग्नयेबलिमतेनुब्रू३हि॥ होता॥ तुभ्यं भरंति क्षितयो य० तन्नो३म॥ आश्राव्य प्रत्याश्राविते अग्निं बलिमंतं यज
ये३ य० हेग्निंबलिमंतैं यादेस्थो अनमयद्द० नः सहोभी ३ वो ३ ष० यजमानः। अग्नयेबलिमतइदं॥ अग्नेर्बलिमतोहं

स्व-स० ७

देवय० यान्नाहोभूयासं॥अनुमतिया [illegible] नक्रुतेषडृहीतं गृहीत्वा दर्विहोमधर्मेण॥अग्नये कामा
यस्वाहा।अग्नये बलिमते स्वाहा॥अनुमत्या इत्यादि अभ्याताना न होमो नेस्विष्टकृत्॥तत्र होता॥ग्ने: कामस्य
प्रि० याव्यग्नेर्बलिमत: प्रिया० याव्यनुमत्या इत्यादि॥सूक्तवाके॥अग्निर्बलिमानिदं हवि० कृत।अनुमति
रित्यादि॥यजमानः॥अग्नये बलिमत इ० अग्नेर्बलिमतो हमुज्जि० अनुमत्या इत्यादि॥ शंयुवन्तं पत्नीसंया
शेषं पूर्ववत् सिद्धमिष्टि: संतिष्ठते॥ ॥अ [illegible] गार्हप० श्रीपरमेश्वरप्रीत्यर्थमनुवित्तीष्ट्या यक्ष्ये।तया०
पुरुषएव० ति॥कालस्तंत्र॥ममाग्ने वर्च इत्यादि पुरोडाशनिर्वापांते॥देव० न्याम नुवित्त्यै जुष्टं निर्वपामि।सर्वं
र्थं निर्वपति॥आनुमतं निरुप्य॥अग्ने काम ह० अनुवित्ते ह० अनुमते० प्रोक्षणे॥देवस्यत्वा० न्यामग्नये कामा
यानुवित्त्या अनुमत्ये वो जुष्टं प्रोक्षामि॥शुंधध्वमित्यादि॥इदमनुवित्त्ये वानुमत्ये नेति द्वितीयराशौ देवतोप
लक्षणं॥अभिघारणे॥आप्या० तेजस्तानुवित्त्ये जुष्टमभिघारयामि॥अनुमत्याभिघारणादि [illegible] पुरोडाशप्र
चारांतमाध्वर्यवमाशेषवत्॥होत्रेतु॥आघावाहुनीते॥अनुवित्तिमाद्य व० अनुमतिमित्यादि॥उत्तमप्रयाजे॥अग्निं
कामं स्वाहानुवित्तिं स्वाहानुमतिमिति विशेषः॥अग्निकामयागकृत्॥अनुवित्त्या अनुब्रू३हि॥पूर्वं देवा अपरेण॥
नुप० परस्तो ३म॥आम्नाभ्यमत्वाप्नावितनुवित्तिं यज॥होता॥ये३ य० हनुवित्तिं प्राणापानौ वक्षुः श्रोत्रं वा० महा
इवो३॥यज० अनुवित्त्या इ० अनुवित्त्या अहं देव यज्यया न्नाद:॥अनुमतियाग: आशेषवत्॥षडृहीतं गृहीत्वा
अग्नये कामाय स्वाहा॥अनुवित्त्ये स्वाहा॥अनुमत्या इत्यादि अभ्याताना नेस्विष्टकृत्॥अग्निकामानुवित्त्योर्म
ध्ये अयाळनुवित्त्या: प्रिया धामानीति विशेषः॥सूक्तवाके॥अनुवित्तिरिदं हवि० अनुमतिरित्यादि॥यजमानः॥ शिव: ७

अनुवित्याइदं० अनुविंद्या अहमु० सर्वमन्यद्दोषोष्टिवद्व्या स्थणलर्पणांतं सिद्धमिष्टिः संतिष्ठते॥ ॥समाम्नायदिवः
श्येन्यनुवित्तयः॥ अथ पाद्यानां प्रयोगः॥ श्वोभूते पत्न्या सह तीर्थेन प्रपद्य गार्हपत्यस्य पश्चाद्दर्भेष्वासीनो द
र्भान्धारयमाणः प्राणानायम्य देशकालादि संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं पाद्या[illegible]नुवित्तीष्टिभिर्यक्ष्ये॥ तामि
स्वर्गलोकमाप्नवानि॥ पुरुषं ध्यात्वा॥ निर्विघ्नार्थं = स्वर्गकामः = गणेशपूजनं संकल्प्य कृत्वा ध्वर्युप्रमुखान्त्वि
जो वृणुयात्॥ आस्वपाद्यानुवित्तीष्टिषु अध्वर्युं त्वां वृणे॥ इत्येवं सर्वान्वृणुयात्॥ पूजयेच्च॥ अथवा समुदायद्वये
स्याप्येककर्मत्वात्॥ दिवः श्येन्यनुवित्ति पाद्यानुवि[illegible]त्तीष्टिभिर्यक्ष्ये इति पूर्वमेव संकल्पः॥ आस्कदिवः श्येन्यनुवित्ति
पाद्या[illegible]नुवित्तीष्टिष्वध्वर्युं त्वां वृणे॥ एवं ब्रह्मादीन्वृणुयादिति॥ पुनः प्राणानायम्य देशकालादि संकीर्त्य श्री०
र्थं तपइष्ट्या यक्ष्ये। तया० मि॥ पुरुषए० हति॥ कालेनस्तंत्रं॥ ममाग्ने वर्च इत्यादि शूर्पे पवित्रे निधाय त्यंतमाधी
ष्टिवत्कुर्यात्॥ निर्वापे॥ यस्कं० ये॥ देवस्य० भ्याम स्त्वयेजुष्टं निर्वपामि॥ आसुपं वसुके वल्ला ग्नेय एव॥ नकोमगुण
विशिष्टः॥ एवं पुरोडाशार्थं निरूप्य॥ यस्कं० ये॥ देवस्य० भ्यां तपसे जुष्टं निर्वपा० प० ये॥ देव० भ्यामनुमत्ये जुष्टं निर्व०
इदमित्यादि॥ अग्ने हव्यं २ रक्षस्व। तपो हव्यं २ र० अनुमते ह० प्रोक्षणे॥ देवस्य० स्त्वा भ्यामग्नये तपसेनुमत्ये वो जुष्टं
प्रोक्षामि॥ शुंधध्वमित्यादि॥ प्रागधिवपनाद्यथा भागं व्यावर्त्तध्वं॥ इति तृतीयं भागं पुरोडाशार्थं भिन्नं कुर्यात्
शिष्ट्ये देवतालक्षयेत्॥ प्रथमराशौ॥ इदमग्नये च॥ इदं तपसे वानुमत्ये च॥ अधिवपनादि ओद्मासनादाघ्रेष्टिवत्॥
उद्मासने। इदमहमित्यादि॥ आप्यायतां घृ० तेजसाग्नयेजुष्टमभिघारं० आप्या० जसा तपसे जुष्टम० आ० नसानु
मत्ये जु० क्रमेणोद्मासनादि॥ न्यूर्ध्वमासादनं यज्ञाः स्वस०॥ अयं यज्ञः॥ विहव्यादिकं तंत्रानुगुण्येन होतारे हि

स्व० स०
८

स्यादि आज्यभागांतं आशेष्टिवत्॥ होत्रे आवाहने॥ अग्निम० सोमम० अग्निम० ३व० तप आ० अनुमतिम० देवां
आज्यपां इत्यादि॥ उक्तेम प्रयाजे॥ ये ३ य० हे स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं स्वाहा तपः स्वाहानुमतिं स्वाहा देवा इत्या
दि॥ वार्त्रघ्नावाज्यभागौ॥ याज्यानुवाक्ये तन्त्रानुगुण्यौ॥ प्रधाने॥ अग्नयेनुब्रूहि॥ अग्निर्मूर्धादिवः० त्वतो ३म॥ आ० अ०
अग्निं यज॥ ये ३ य० हे ग्निं जुषो यज्ञ० वांहा ३ वौ ३ ष० यज० अग्नय इ० अग्नेरहं दे० यान्त्वा दो०॥ तपसेनुब्रू ३ हि॥ तप
सा देवा देवतां म० यः स्तो ३ म॥ आ० अ० तपो यज॥ ये ३ य० हे तपः प्रथम जं देव२ हवि० बभ्रूवा ३ वौ ३ ष० यज० तप
स इदं० तपसोहं देवय० यान्त्वा दो०॥ अनुमतियाग आशेष्टिवत्॥ जुह्वां पञ्चगृहीतं गृहीत्वाग्रेणाहवनीयं परी
त्य दक्षिणतस्तिष्ठन्॥ अग्नये स्वाहा॥ तपसे स्वाहा॥ अनुमत्यै० प्रजापतये० स्वर्गाय लो० अग्नये स्विष्ट० यथालिं
गं स्वाहाः॥ ततोष्टादशगृहीतेनाप्यातानहोमः॥ स्विष्टकृद्यागः प्राग्वत्॥ तत्र॥ ये ३ य० हे ग्निं स्विष्टकृतम०
म स्य प्रि० सोळक्तेः प्रि० याद्रूपसः प्रि० याधा० अनुमत्याः प्रि० देवानामित्यादि॥ विरुन्य प्राशित्रं सर्वेषां॥ चतुर्धाक
रणं च॥ दक्षिणा अप्याशेष्टिवत्॥ सूक्तवाके॥ अग्निरिदं० कृत॥ सोम इदं० कृत॥ अग्निरिदं० कृत॥ तप इदं० कृत
अनुमतिरि० कृत॥ देवा आज्यपा इत्यादि॥ यजमानः॥ अग्नय इ० अग्नेरहं० षं॥ सोमायेदं० सोमस्याहमु० षं॥ अ
ग्नय इ० अग्नेरहमु० षं तपस इ० तपसोह० षं॥ अनुमत्या० अनुमत्या अहमु० षं॥ देवेभ्य इत्यादि॥ चत्वारः पत्नीसं
याजाः॥ न पार्वणः॥ सर्वमन्यदाशेष्टिवत्सिद्धमिष्टिः संतिष्ठते॥ ॥अथ ब्रह्मौदनेनेगार्ह० परमेश्वरप्रीत्यर्थं ब्र
ह्मौदनेन यक्ष्ये॥ तयाय० मि॥ पुरु० ति॥ कालतस्तन्त्रं॥ ममाग्ने इत्यादि आग्नेयपुरोडाशनिर्वापान्तं कृत्वा॥ देवस्य० प्राणं
श्रद्धायै जुष्टं निर्व० देव० प्राणमनुमत्यै जु० इति चरुं निरुप्य॥ इदममित्यादि॥ अद्भिर्हव्यं २० प्रोक्षणे देवस्य० प्राणमग्नये

शिवः
८

श्र

श्रद्धायै त्वानुमत्यै च॥ अधिवप
श्रद्धाया अनुमत्यै वो जुष्टं प्रोक्षामि॥ अधिवपनाग्राग्नाशिष्टं पञ्चकृत्वा द्वितीयराशौ॥ इदं श्रद्धायै त्वानुमत्यै च॥ अधिवप
नादि आग्नेयाभिघारणान्ते॥ आप्याय॰ तेजसा श्रद्धायै जुष्टमभि॰ पुरोडाशयागान्तं प्राग्वत्॥ होत्रे तु॥ अग्न्यनुमत्यो
रन्तरा॥ श्रद्धामावह॰ उत्तमप्रयाजे तस्मिन्नेव स्थाने स्वाहा श्रद्धां स्वाहानुमतिमिति विशेषः॥ अध्वर्युः॥ अग्नियागे कृ
ते॥ श्रद्धाया अनुब्रूहि॥ श्रद्धया देवो देवः॰ जुहानो३म्॥ आ॰ अ॰ श्रद्धां यज॥ ये३॰ हे श्रद्धा श्रद्धा देवी प्र॰ धात्री शान्ता
दे वी भुवनस्याधिपत्नी ३ वौ॰॥ पञ्चपदा याज्या॥ यजमानः श्रद्धाया इदं॰ श्रद्धाया अहं देव॰ मान्नादः॥ अनुमतियं
गः॥ उपहोमे॥ अग्नये स्वाहा॥ श्रद्धायै स्वाहा॥ अनुमत्या इत्यादि॥ अभ्यातानहोमान्ते स्विष्टकृद्यागः॥ तत्राग्न्यनु
मत्योर्मध्ये याज्या श्रद्धायाः प्रिया धामानीति विशेषः॥ ततोऽध्वर्युः प्राशित्रग्रहणादि कुर्यात्॥ सूक्तवाके द्वितीयं
स्थाने श्रद्धेदं ह॰ वृत॥ यजमानः॥ श्रद्धाया इदं॰ श्रद्धाया अहमु॰ षं॥ अन्यत्सर्वं प्राग्वत्सिद्धम्भिः संतिष्ठते॥ ॥
अथ श्वो न लगा हं पश्यस्यप॰ रमेश्वर प्रीत्यर्थं सत्येष्ट्यां यक्ष्ये॥ तथा॰ पुरुष॰ हति॥ कालतस्तन्त्रं॥ ममाग्न इत्यादि
पुरोडाशनिर्वापान्तमाग्नेयेष्टिवत्॥ पुरोडाशं निरुप्य॥ देवस्य॰ भ्यां सत्याय जुष्टं निर्वपामि॥ चर्वर्थान्॥ आनुमतं
वरं निरुप्य इदमित्यादि॥ अग्नेह॰ सत्यं हव्यं॰ द॰ अनुमते हव्य॰ प्रोक्षणे॥ देवस्य त्वा॰ भ्यामग्नये सत्याय वो नुम
त्यै वो जुष्टं प्रोक्षामि॥ अधिवपनाद्याग्राशिष्टं प्राग्वत्कृत्वा द्वितीयराशौ देवलेउपलक्षयेत्॥ इदं सत्याय
वानुमत्यै च॥ अधिवपनादि आग्नेयाभिघारणान्ते॥ आप्या॰ तेजसा सत्याय जुष्टमभिघारयामि॥ अनुम
त्सभिघारणादि॥ पुरोडाशयागान्ते केतारत्नु सुपत्नीयेत्यादि॥ सत्यायानुब्रूहि॥ आगासत्यं हविरि॰ मदे
= होत्रे तु॥ श्रद्धास्थाने सत्यमावह॥ उत्तमप्रयाजे सत्यं स्वाहानुमतिमित्यादि॥ = मो३म्॥ आश्राव्य प्रत्याश्रावि

ते सत्यं यज ॥ होता ॥ ये३ यजामहे सत्यं यस्य प्रति० सर्वे ॥ तत्सत्यमर्च० मोदमानां३ वौ३षट् ॥ यजमानः ॥ सत्या
येदं० सत्यस्याहं देवयज्यया न्नादः ॥ आनुमतेनेष्ट्वा ॥ स्रुचि षड्गृहीत्वा दर्विहोमधर्मेण ॥ अग्नये स्वाहा ॥ सत्याय०
अनुमत्यै० प्रजापतये० स्वर्गाय लोका० अग्नये स्विष्टकृते स्वाहा ॥ यथालिंगं त्यागाः ॥ अन्यानानाहुत्वा स्विष्ट
कृत् ॥ तत्र ॥ याऽग्नेः प्रिया धामान्ययाट् सत्यस्य प्रिया धामान्ययाळनुमत्या इत्यादि ॥ सूक्तवाके ॥ सत्यमिदं ह
विरजुष० कृत ॥ सत्यायेदं० सत्युस्याहमु० षं ॥ अन्यत्प्रागवत्सिद्धमिष्टिः संतिष्ठते ॥ ॥अ[illegible]स्तेगाहेपस्य
स्य पश्चादित्यादि ॥ मनइष्ट्या यक्ष्ये ॥ तया ॥ ० ॥ काळस्तत्र ॥ मन्माग्न इत्यादि पुरोडाश निर्वापांतं सत्येष्टिवत् ॥
यत्कृतां० देवस्य० म्यां मनसे जुष्टं निर्वपामि ॥ अनुमत्यै जुष्टं मित्यादि ॥ मनोह व्यं रक्षस्व ॥ प्रोक्षणे ॥ देवस्य० म्या
मग्नये मनसेनुमत्यै वो जुष्टं प्रोक्षामि ॥ अधिवपन्न स्नाग्ना शिद्धयं कृत्वा ॥ इदमग्नये कामायव ॥ इदं मनसे वसत्या
यव ॥ अधिवपनादि आग्नेयाभिघारणांते ॥ तेजसा मनसे जुष्टमभिघारयामि ॥ उद्वासनादि ॥ हे लुरावाहने
सत्यस्थाने मन आ३वह । अनुमतिमित्यादि पुरोडाशयागांते स्रुच्युपस्तीर्येत्यादि ॥ मनसे नुब्रूहि ॥ होता ॥ मन
सो वशे सर्वमिदं० पाउषयज्ञमागोऽ३म ॥ अध्वर्युरत्याक्रम्याश्राव्य प्रत्याश्राविते ॥ मनो यज ॥ होता ॥ ये३ यजा म
हे मन आकूती० स्यामा३ वौ३षट् ॥ यजमानः ॥ मनस इदं ॥ मनसोहं देवयज्यया न्नादः ॥ अनुमतियागं कृत्वा स्रु
चि षड् तं गृहीत्वा दर्विहोमधर्मेण ॥ अग्नये स्वाहा ॥ मनसे स्वा० अनुमत्या इत्यादि ॥ स्विष्टकृन्निगदेऽग्नमनु म शिवः ९

त्योर्मध्ये याणमनसः प्रिया धामान्ययाळनुमत्याइत्यादि॥ सूक्तवाके॥ द्वितीयस्थाने मनइदंह० षता० घत० कृत॥
यजमानः मनसइदं० मनसोहमुज्जितिम्० अन्यत्समानेष्टिवत्सिद्धमिष्टिः संतिष्ठते॥ ॥अथ[illegible]लेगार्हपत्यस्यप
श्वादित्यादिश्रीपरमेश्वरप्रीत्यर्थं वरणेष्ट्यायक्ष्ये॥ तया० पुरुष० कालतरस्तंत्रं॥ ममाग्नइत्यादि॥ पुरोडाशनिर्वापां
ते॥ यस्य० देवस्यत्वा० न्यां वरणाय जुष्टं निर्वपामि॥ आनुमतं निरूप्य इदमित्यादि॥ वरण हव्यं रक्षस्व॥ प्रोक्षणे॥ द
वस्य० स्त्वाभ्यामग्नये वरणायानुमत्यै वो जु० क्षामि॥ अधिवपनाश्रुप्राशित्रं यं कसा द्वितीयराशौ देवते उपलक्षयेत्
इदं वरणायवानुमत्यैव॥ अधिवपनादि॥ तेजसा वरणायजुष्टमभिघारयामि ॥आनुमतमभिघारणादिहोतु
रावाहने॥ द्वितीयस्थाने वरणमा ३ वह अनुमतिमित्यादि॥ उत्तमे प्रयाजे॥ अग्नये स्वाहा वरणाय स्वाहानुमत्या इ
त्यादि॥ पुरोडाशप्रचारांते उपस्तरणादि॥ वरणायानुब्रू ३ हि॥ होता॥ वरणं पवित्रं वितंतं० रेमो ३ म॥ आश्राव्य
प्रत्याश्राविते॥ वरणं यज॥ ये ३ यजामहे वरणं लोकस्यद्वारमर्चिमत्य० दधातु ३ वौषट्॥ यजमानः। वर
णायेदं॥ वरणस्याहं देवयज्ययान्नादः॥ अनुमतेन प्रचर्य षड्होतेनाज्येन॥ अग्नये स्वाहा। वरणाय स्वाहा॥ अनु
मत्या इत्यादि॥ स्विष्टकृल्लिंगदे मनः स्थाने याड्वरणस्य प्रियाधामान्ययाळनुमत्या इत्यादि॥ सूक्तवाके॥ वरण
मिदंह० षता० घत० कृत॥ अनुमतिरित्यादि॥ वरणायेदं॥ वरणस्याहमुज्जिति० षं॥ इतरत्प्राग्वत्सिद्धमिष्टिः सं
तिष्ठते॥ ॥स[illegible]लेसमाप्त्यर्थं सोमेन पशुना वा यष्टव्यं॥ बोधायनाचार्यैरुक्तत्वात्॥ अथवा पशुस्थाने इष्टिर्वैश्वा
नरीवातस्मिन्नेव हनि उत्तरस्मिन्वा हिरण्यदक्षिणा वा कार्या॥ अग्निर्वैश्वानरो देवता॥ द्वादशकपालः पुरोडा
त्

शः॥आग्नेयविकारः॥कालतस्तंत्रं॥पंचदशसामिधेन्यः॥शतमानंहिरण्यंदक्षिणा॥वैश्वानरोनऊत्याऽपृष्टो
दिवीतियाज्यानुवाक्ये॥चत्वारः पत्नीसंयाजाः॥पुनरालंभपार्वणवर्ज्यंसिद्धमिष्टिः संतिष्ठते॥ ॥श्रीः॥
यंदेवाविषदाहपीडितशरीराब्रह्मविष्ण्वादयः कैलासाचलमूर्धगेवटलरौप्येशिवासंयु
तं॥त्रैलोक्यार्तिहरंवराचरगुरुं दृष्ट्वाभवन्तीरुजः सोयंभक्तविपद्विनाशनपरस्त्रष्टाभ
वत्वीश्वरः॥काशीनाथतनूजेनबापूश्केन निर्मिता॥पद्धतिः स्वर्गसत्रस्य सासांबेस्त्रस
मर्पिता॥ ॥खवर्गद्वाऽत्यष्टिमितेश्कलेमे किलकाब्दे भुचोसिते॥वसौगुरौस्वर्गसत्रप्रयोगः पू
र्णतामगात्॥ ॥श्रीसांबसदाशिवार्पणमस्तु॥श्रीहरिहरेश्वर योगेश्वर्यौ कुलदेवते वर
देभवेतां॥